॥ वाल्मीकि रामायण॥

६ युद्धकाण्ड

अध्याय ८३

आर्तानां राक्षसीनां तु लङ्कायां वै कुले कुले ।
रावणः करुणं शब्दं शुश्राव परिवेदितम् ॥ १॥

स तु दीर्घं विनिश्वस्य मुहूर्तं ध्यानमास्थितः ।
बभूव परमक्रुद्धो रावणो भीमदर्शनः ॥ २॥

सन्दश्य दशनैरोष्ठं क्रोधसंरक्तलोचनः ।
राक्षसैरपि दुर्दर्शः कालाग्निरिव मूर्छितः ॥ ३॥

उवाच च समीपस्थान्राक्षसान्राक्षसेश्वरः ।
भयाव्यक्तकथांस्तत्र निर्दहन्निव चक्षुषा ॥ ४॥

महोदरं महापार्श्वं विरूपाक्षं च राक्षसं ।
शीघ्रं वदत सैन्यानि निर्यातेति ममाज्ञया ॥ ५॥

तस्य तद्वचनं श्रुत्वा राक्षसास्ते भयार्दिताः ।
चोदयामासुरव्यग्रान्राक्षसांस्तान्नृपाज्ञया ॥ ६॥

ते तु सर्वे तथेत्युक्त्वा राक्षसा घोरदर्शनाः ।
कृतस्वस्त्ययनाः सर्वे रावणाभिमुखा ययुः ॥ ७॥

प्रतिपूज्य यथान्यायं रावणं ते महारथाः ।
तस्थुः प्राञ्जलयः सर्वे भर्तुर्विजयकाङ्क्षिणः ॥ ८॥

अथोवाच प्रहस्यैतान्रावणः क्रोधमूर्छितः ।
महोदरमहापार्श्वौ विरूपाक्षं च राक्षसं ॥ ९॥

अद्य बाणैर्धनुर्मुक्तैर्युगान्तादित्यसंनिभैः ।
राघवं लक्ष्मणं चैव नेष्यामि यमसाधनम् ॥ १०॥

खरस्य कुम्भकर्णस्य प्रहस्तेन्द्रजितोस्तथा ।
करिष्यामि प्रतीकारमद्य शत्रुवधादहम् ॥ ११॥

नैवान्तरिक्षं न दिशो न नद्यो नापि सागरः ।
प्रकाशत्वं गमिष्यामि मद्बाणजलदावृताः ॥ १२॥

अद्य वानरयूथानां तानि यूथानि भागशः ।
धनुःसमुद्रादुद्भूतैर्मथिष्यामि शरोर्मिभिः ॥ १३॥

व्याकोशपद्मचक्राणि पद्मकेसरवर्चसाम् ।
अद्य यूथतटाकानि गजवत्प्रमथाम्यहम् ॥ १४॥

सशरैरद्य वदनैः सङ्ख्ये वानरयूथपाः ।
मण्डयिष्यन्ति वसुधां सनालैरिव पङ्कजैः ॥ १५॥

अद्य युद्धप्रचण्डानां हरीणां द्रुमयोधिनाम् ।
मुक्तैनैकेषुणा युद्धे भेत्स्यामि च शतंशतम् ॥ १६॥

हतो भर्ता हतो भ्राता यासां च तनया हताः ।
वधेनाद्य रिपोस्तासां कर्मोम्यस्रप्रमार्जनम् ॥ १७॥

अद्य मद्बाणनिर्भिन्नैः प्रकीर्णैर्गतचेतनैः ।
करोमि वानरैर्युद्धे यत्नावेक्ष्य तलां महीम् ॥ १८॥

अद्य गोमायवो गृध्रा ये च मांसाशिनोऽपरे ।
सर्वांस्तांस्तर्पयिष्यामि शत्रुमांसैः शरार्दितैः ॥ १९॥

कल्प्यतां मे रथशीघ्रं क्षिप्रमानीयतां धनुः ।
अनुप्रयान्तु मां युद्धे येऽवशिष्टा निशाचराः ॥ २०॥

तस्य तद्वचनं श्रुत्वा महापार्श्वोऽब्रवीद्वचः ।
बलाध्यक्षान्स्थितांस्तत्र बलं सन्त्वर्यतां इति ॥ २१॥

बलाध्यक्षास्तु संरब्धा राक्षसांस्तान्गृहाद्गृहात् ।
चोदयन्तः परिययुर्लङ्कां लघुपराक्रमाः ॥ २२॥

ततो मुहूर्तान्निष्पेतू राक्षसा भीमविक्रमाः ।
नर्दन्तो भीमवदना नानाप्रहरणैर्भुजैः ॥ २३॥

असिभिः पट्टसैः शूलैर्गलाभिर्मुसलैर्हलैः ।
शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः कूटमुद्गरैः ॥ २४॥

यष्टिभिर्विमलैश्चक्रैर्निशितैश्च परश्वधैः ।
भिण्डिपालैः शतघ्नीभिरन्यैश्चापि वरायुधैः ॥ २५॥

अथानयन्बलाध्यक्षाश्चत्वारो रावणाज्ञया ।

द्रुतं सूतसमायुक्तं युक्ताष्टतुरगं रथम् ॥ २६ ॥

आरुरोह रथं दिव्यं दीप्यमानं स्वतेजसा ।
रावणः सत्त्वगाम्भीर्याद्दारयन्निव मेदिनीम् ॥ २७ ॥

रावणेनाभ्यनुज्ञातौ महापार्श्वमहोदरौ ।
विरूपाक्षश्च दुर्धर्षो रथानारुरुहुस्तदा ॥ २८ ॥

ते तु हृष्टा विनर्दन्तो भिन्दत इव मेदिनीम् ।
नादं घोरं विमुञ्चन्तो निर्ययुर्जयकाङ्क्षिणः ॥ २९ ॥

ततो युद्धाय तेजस्वी रक्षोगणबलैर्वृतः ।
निर्ययावुद्यतधनुः कालान्तकयमोमपः ॥ ३० ॥

ततः प्रजवनाश्वेन रथेन स महारथः ।
द्वारेण निर्ययौ तेन यत्र तौ रामलक्ष्मणौ ॥ ३१ ॥

ततो नष्टप्रभः सूर्यो दिशश्च तिमिरावृताः ।
द्विजाश्च नेदुर्घोराश्च सञ्चचाल च मेदिनी ॥ ३२ ॥

ववर्ष रुधिरं देवश्चस्खलुश्च तुरङ्गमाः ।
ध्वजाग्रे न्यपतद्गृध्रो विनेदुश्चाशिवं शिवाः ॥ ३३ ॥

नयनं चास्फुरद्वामं सव्यो बाहुरकम्पत ।
विवर्णवदनश्चासीत्किं चिदभ्रश्यत स्वरः ॥ ३४ ॥

ततो निष्पततो युद्धे दशग्रीवस्य रक्षसः ।
रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे ॥ ३५ ॥

अन्तरिक्षात्पपातोल्का निर्घातसमनिस्वना ।
विनेदुरशिवं गृध्रा वायसैरनुनादिताः ॥ ३६ ॥

एतानचिन्तयन्घोरानुत्पातान्समुपस्थितान् ।
निर्ययौ रावणो मोहाद्बधार्थी कालचोदितः ॥ ३७ ॥

तेषां तु रथघोषेण राक्षसानां महात्मनाम् ।
वानराणामपि चमूर्युद्धायैवाभ्यवर्तत ॥ ३८ ॥

तेषां सुतुमुलं युद्धं बभूव कपिरक्षसाम् ।
अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छताम् ॥ ३९ ॥

ततः क्रुद्धो दशग्रीवः शरैः काञ्चनभूषणैः ।
वानराणामनीकेषु चकार कदनं महत् ॥ ४० ॥

निकृत्तशिरसः के चिद्रावणेन वलीमुखाः ।
निरुच्छ्वासा हताः के चित्के चित्पार्श्वेषु दारिताः ।
के चिद्विभिन्नशिरसः के चिच्चक्षुर्विवर्जिताः ॥ ४१ ॥

दशाननः क्रोधविवृत्तनेत्रो
यतो यतोऽभ्येति रथेन सङ्ख्ये ।
ततस्ततस्तस्य शरप्रवेगं
सोढुं न शेकुर्हरियूथपास्ते ॥ ४२ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com